दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लसप्तमी
ज्येष्ठ 09 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-210 | 1 | मई 23, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 HP CABINET MEETING- सीबीएसई-विद्यालयेषु १५०० शिक्षकाणां पूरणसहितं विविधानां विभागानां २२१५ पदानां कृते मन्त्रिमण्डलस्य अनुमोदनम्

3 लोकनिर्माणमन्त्री विक्रमादित्यसिंहः कर्नाटकस्य मुख्यमन्त्रिणा उपमुख्यमन्त्रिणा च सह 'बेङ्गलूरु-प्रारूप' विषये चर्चां कृतवान्

5 उपमुख्यमन्त्रिणा विजयकुमारचौधरिणा पञ्चदशाभ्यर्थिभ्यः नियुक्तिपत्राणि प्रदत्तानि

## भारत-साइप्रस देशयोः मध्ये नवदिल्ल्याम् आतंकवादावरोधस्य नवान्वेषण-तन्त्रज्ञानयोः विषये सन्धिपत्राणां आदानप्रदानम् अभवत्



भारत-साइप्रस देशयोः मध्ये नवदिल्ल्याम् आतंकवादावरोधस्य विषये, नवान्वेषण-तन्त्रज्ञानयोः, उच्चशिक्षायां, अनुसंधाने, सांस्कृतिकसहयोगे च संयुक्तकार्यसमूहस्य स्थापनेत्यादीनां विभिन्नक्षेत्रेषु अनेकेषां सन्धिपत्राणां आदानप्रदानम् अभवत्। प्रधानमन्त्री नरेन्द्रमोदी साइप्रस देशस्य राष्ट्रपतिना निकोस् क्रिस्टोडौलाइड्स् इत्यनेन सह विविधेषु क्षेत्रेषु द्वैपाक्षिकसहकारं सुदृढी कर्तुं चर्चा कृतवान्। बहुपाक्षिक-मञ्चेषु सहकार्येण सह क्षेत्रीय-वैश्विक-महत्त्वस्य विषयेषु अपि तौ विचाराणाम् आदानप्रदानं कृतवन्तौ। संयुक्त-वक्तव्ये प्रधानमन्त्रिणा नरेन्द्रमोदिना भारत-साइप्रस-देशयोः मैत्री न केवलं दृढः अपितु भविष्य-अभिमुखी अपि अस्तीति उक्तम्। सः अवदत् यत्, गतदशके साइप्रस देशात् भारते निवेशः प्रायः द्विगुणितः अभवत्। तेनोदीरितं यत्, भारत-यूरोपीय-सङ्घ-मुक्तव्यापारसमन्वयेन अनेकाः नूतनाः सम्भावनाः उद्भूताः सन्ति, उभयोः देशयोः मध्ये विश्वासः च वर्धितः अस्ति। अग्रिमेषु पञ्चवर्षेषु पुनः निवेशप्रवाहं द्विगुणीकर्तुं भारत-साइप्रस देशयोः लक्ष्यम् अस्तीति श्रीमोदी अवदत्। साइप्रस देशस्य राष्ट्रपतिः निकोस् क्रिस्टोडीलाइड्स् इत्येषः अवदत् यत् उभयोः राष्ट्रयोः मध्ये द्वैपाक्षिकसम्बन्धाः, यूरोपीयसङ्घ भारतसम्बन्धाः च गतवर्षे अत्यन्तं प्रगतिम् अकुर्वन्। प्रातःकाले विदेशमन्त्री डा. एस्. जयशङ्करः साइप्रस देशस्य राष्ट्रपतिना सह मेलनं कृतवान्। सामाजिकान्तर्जालीये पटले डा. जयशङ्करः अवदत् यत् सः द्वयोः राष्ट्रयोः मध्ये द्वैपाक्षिक-सम्बन्धान् सुदृढं कर्तुं, भारत-यूरोपीय सहयोगाय च सकारात्मक-भावानां मार्गदर्शनस्य च प्रशंसाम् अकरोत्। साइप्रस देशस्य राष्ट्रपतिः निकोस् क्रिस्टोडीलाइड्स् इत्येषः भारतस्य चतुर्दिवसीय यात्रायाम् अस्ति।

## सी. बी. एस्. ई. विद्यालयेषु तिसृणां भाषाणाम् अनिवार्यताविषये सर्वोच्चन्यायालये श्रवणाय सहमतिः



सर्वोच्चन्यायालयेन अग्रिमसप्ताहे याचिकायाः श्रवणाय सहमतिः प्रदत्ता। याचिकायां सी. बी. एस्. ई. इत्यस्य नूतन-नीतेः विरोधः अस्ति, यस्याः अन्तर्गतं जुलाई-मासस्य प्रथम-दिनाङ्कात् नवम-दशम-वर्गयोः छात्राणां कृते तिस्रः भाषाः अनिवार्याः कृताः। वरिष्ठ अधिवक्ता मुकुल् रोहत्गी इत्येषः मुख्यन्यायाधीशस्य सूर्यकान्तस्य नेतृत्वे पीठस्य समक्षं प्रकरणम् उपस्थापितवान्। न्यायपीठे न्यायमूर्ती जोय्मल्या बाग्ची तथा विपुल् एम् पञ्चोली आस्ताम्। छात्रैः, शिक्षकैः तथा मातापितृभिः संयुक्तरूपेण याचिका प्रस्तुता अस्ति। सः अवदत् यत् सी.बी. एस्. ई. इत्यस्य एतस्याः नूतन नीतेः अन्तर्गतं नवम-दशम-वर्गयोः अतिरिक्त-भाषाद्वयस्य अध्ययनम् अनिवार्यं कृतम् अस्ति, येन अतीव समस्या उत्पद्येत। सः न्यायालयं सोमवासरे विचारणार्थं विषयस्य सूचीकरणाय प्रार्थितवान्। मुख्यन्यायाधीशः अवदत् यत् अग्रिमसप्ताहे "विविध-श्रवण-सप्ताहे" प्रकरणेस्मिन् विचारः भविष्यति।

## निर्वाचन आयोगेन दश-राज्येषु चतुर्विंशतिः राज्यसभा सदस्यानां द्विवार्षिक निर्वाचनस्य कार्यक्रमस्य घोषणा कृता




निर्वाचन आयोगेन दश-राज्येषु चतुर्विंशतिः राज्यसभा सदस्यानां द्विवार्षिक निर्वाचनस्य कार्यक्रमस्य घोषणा कृता। भूतपूर्वः प्रधानमन्त्री एच्. डी. देवगौडा, केन्द्रीयमन्त्रिणी जॉर्ज कुरियन् तथा रवनीत् सिंहः च तेषु सदस्येषु अन्तर्भवन्ति, येषां कार्यकालः अग्रिमे मासे समाप्तः भविष्यति। आन्ध्रप्रदेशे, गुजराते तथा कर्णाटके प्रत्येकस्मिन् राज्ये चत्वारि आसनानि सन्ति। राजस्थाने तथा मध्यप्रदेशे प्रत्येकस्मिन् राज्ये त्रीणि आसनानि सन्ति। झारखण्डे द्वे आसने स्तः। मणिपुरे, मेघालये, अरुणाचलप्रदेशे तथा मिजोरामे प्रत्येकस्मिन् राज्ये एकैकम् आसनं रिक्तं भविष्यति। आयोगस्य अनुसारम् अग्रिममासस्य प्रथमे दिनाङ्के अधिसूचनायाः निर्गमनं भविष्यति तथा जूनमासस्य अष्टादश दिनाङ्के मतदानं भविष्यति। मतगणना अपि तस्मिन्नेव दिने भविष्यति। महाराष्ट्रस्य तमिलनाडुराज्यस्य च प्रत्येकस्य एकस्य आसनस्य कृते राज्यसभायाः उपनिर्वाचनम् अपि आयोगेन घोषितम्। एतद् निर्वाचनम् अपि अग्रिममासस्य अष्टादश दिनाङ्के भविष्यति।

## समग्र-सीमाम् अभेद्यतरां कर्तुं सर्वकारः स्मार्ट-सीमा परियोजनायाः आरम्भंकरिष्यति-अमितशाहः




केन्द्रीय गृहमन्त्री अमितशाहः अवदत् यत् समग्र-सीमाम् अभेद्यतरां कर्तुं सर्वकारः स्मार्ट-सीमा परियोजनायाः आरम्भंकरिष्यति। नवदिल्ल्यां बी.एस्.एफ.-संस्थायाः अलंकरण-समारोहं सम्बोधयन् श्री शाहः अवदत् यत् एषा परियोजना ड्रोन, रडार, कैमरा इत्यादिभिः प्रौद्योगिकी-संसाधनैः सुसज्जिता भविष्यति। सः अवदत् यत् आगामी एकवर्षान्तर्गतं सीमा सुरक्षा-बलस्य सुरक्षा-व्यवस्थायां "स्मार्ट-बार्डर्-कॉन्सेप्ट्" इत्यस्य अन्तर्गतं सर्वासां प्रौद्योगिकीनाम् एकीकरणं कृत्वा अभेद्य-सीमा सुरक्षा-संरचनायाः विकासाय द्रुतगत्या कार्यं प्रचलति।

## सुभाषितम्

**मनसा चिन्तितं कर्मं,**
**वचसा न प्रकाशयेत्।**
**अन्यलक्षित कार्यस्य,**
**यतः सिद्धिर्न जायते।।**

यदि तुमने किसी कार्य को करने का निश्चय (अपने मन में विचार) किया है तो उस विचार को स्वयं अपने मुख से अन्य व्यक्तियों को नहीं बताना चाहिए, क्योंकि अन्य व्यक्तियों द्वारा ज्ञात और दृष्ट ऐसे कार्य सफल नहीं हो पाते हैं।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केताः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## पश्चिमबङ्गलस्य मुख्यमन्त्री राष्ट्रपतिभवने राष्ट्रपतिना सह मिलितवान्



पश्चिमबङ्गालराज्यस्य नेता शुभेन्दु अधिकारी राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदी मुर्मु इत्यनया सह मिलितवान्। सः रक्षामन्त्रिणा राजनाथसिंहेन् सहापि मेलनं विहितवान्। सामाजिक-माध्यमे श्री राजनाथसिंहः अवदत् यत् शुभेन्दु अधिकारी समृद्धेन राजनैतिक-विधायी-अनुभवेन युक्तः व्यक्तिः अस्ति। सः आत्मविश्वासं प्रकटितवान् यत् श्री अधिकारी पश्चिमबङ्गालराज्यं नूतन औन्नत्यं प्रति नेतुं कार्यं करिष्यति।

# HP CABINET MEETING- सीबीएसई- विद्यालयेषु १५०० शिक्षकाणां पूरणसहितं विविधानां विभागानां २२१५ पदानां कृते मन्त्रिमण्डलस्य अनुमोदनम्



हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य सर्वकारीय- सीबीएसई- विद्यालयेषु १५०० शिक्षकाणां पूरणसहितं विविधानां विभागानां २२१५ तः अधिकानि पदानि पूरयिष्यन्ते। 'इन्दिरागान्धी-प्रियभगिनी-महिलासम्माननिधिः' योजनायाः अन्तर्गतं प्रतिमासं १५०० रूप्यकाणि अधुना लक्षद्वयात् (२ लाख) न्यूनायवतीभ्यः महिलाभ्यः एव प्रदास्यन्ते। पर्यटन-ऋतौ प्रदेशे आपणानि (दुकानें) २४ होराः यावत् उद्घाटिताः स्थास्यन्ति। शुक्रवासरे राज्यसचिवालये मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खुमहोदयस्य अध्यक्षतायां सञ्जातायां मन्त्रिमण्डलस्य (कैबिनेट) उपवेशने एतेषाम् अतीव प्रमुखाणां निर्णयानां अनुमोदनं जातम्। शिक्षा- रोजगार- सामाजिकसुरक्षासु च मन्त्रिमण्डलस्य विशेषमवधानम् आसीत्।

## आपणानि २४ होराः यावत् उद्घाटयितुं मन्त्रिमण्डलस्य निर्णयः

प्रदेशे पञ्चायत-निर्वाचनकारणात् प्रवृत्तायाः 'निर्वाचन-आचारसंहितायाः' हेतोः सर्वकारेण अस्मिन् मन्त्रिमण्डलस्य उपवेशनस्य निर्णयान् विज्ञापयितुं काऽपि आधिकारिकी प्राकाश्य-वार्ता न कृता। विभागीय-अधिकारीभिः विज्ञापितं यत् मन्त्रिमण्डलेन राज्ये व्यापारिक-प्रवृत्तीनां वर्धनाय पर्यटन- आधारित- अर्थव्यवस्थायाः गत्यै च आपणानि २४ होराः यावत् उद्घाटयितुं स्वीकृतिः दत्ता। अनेन पर्यटनस्थलानां, नगरीक्षेत्राणां, सेवाक्षेत्रस्य च महती सहायता भविष्यति। होटल्-भोजनशाला-औषधालयानाम्, अन्यासाम् आवश्यकीनां सेवानां च व्यवसायिभ्यः महत् संबलं मिलिष्यति।

## एताभ्यः महिलाभ्यः प्राप्स्यन्ते १५००-१५०० रूप्यकाणि

उच्चशिक्षाक्षेत्रेण सम्बन्धे एकेन प्रमुखनिर्णयेन महाविद्यालय-प्राध्यापकानां सेवानिवृत्ति-आयुः ६२ वर्षतः वर्धयित्वा ६३ वर्षं कर्तुं स्वीकृतिः विहिता। सर्वकारस्य मान्यता अस्ति यत् अनेन अनुभवीनां शिक्षकाणां सेवानां लाभः संस्थाभ्यः सुदीर्घकालं यावत् प्राप्स्यते। मन्त्रिमण्डलेन मुख्यमन्त्रिणः घोषणाम् अनुसृत्य एतादृशानां परिवाराणां महिलाभ्यः प्रतिमासं १५०० रूप्यकाणि दातुं प्रस्तावः स्वीकृतः, येषां वार्षिकी आयः लक्षद्वय- रूप्यकेभ्यः न्यूना अस्ति। एषा काङ्ग्रेस-पक्षस्य मुख्या निर्विचनप्रतिज्ञायोजना आसीत्। सर्वकारस्य पक्षः अस्ति यत् अनेन आर्थिकरूपेण दुर्बलानां परिवाराणां महिलाभ्यः साक्षात् वित्तीय-सहायता प्राप्स्यते।

## एतेषु विभागेषु पूरयिष्यन्ते पदानि, सीबीएसई-विद्यालयेषु अपि भविष्यति नियुक्तिः

मन्त्रिमण्डलेन आरक्षकविभागे लिपिकानां १२ पदानां पूरणाय अपि स्वीकृतिः दत्ता। 'सीनियर रेजिडेंट' चिकित्सकानां १०५ पदानां, 'एपीआरओ' (APRO) पदस्य चतुर्णां पदानां पूरणाय च अनुमोदनं विहितम्। अपरतः, विद्यालयीय- शिक्षा- मण्डलेन सम्बद्धेषु ३०० विद्यालयेषु सीबीएसई- विद्यालयानां सदृशाः सुविधाः प्रदास्यन्ते। राज्यस्य सीबीएसई-सम्बद्धेषु सर्वकारीय-विद्यालयेषु १५०० पदानां पूरणाय अपि स्वीकृतिः प्राप्ता। 'जेओए आईटी' इत्यस्य ५०० पदानां तथा 'आईटीआई' इत्यत्र 'क्राफ्ट इंस्ट्रक्टर' इत्यस्य ९४ पदानां पूरणाय अपि अनुमतिः दत्ता।

## एतेषां मानदेयराशिः वर्धिष्यते-

'मिड-डे मील' कर्मचारिणाम्, 'एसएमसी', 'मल्टी टास्क' कर्मचारिणां च मानदेये ५०० रूप्यकाणां वृद्धिं कर्तुं निर्णयः स्वीकृतः। पञ्चायत-द्वारपालानां ५०० रूप्यकाणि तथा सीवन-अध्यापिकानां मानदेये १००० रूप्यकाणां वर्धनम् अपि मन्त्रिमण्डलेन स्वीकृतम्। लोकनिर्माणविभागे 'मल्टी टास्क' कर्मचारिणां मानदेयं ५५०० रूप्यकेभ्यः वर्धयित्वा ६००० रूप्यकाणि कर्तुं निर्णयः जातः। मन्त्रिमण्डलेन बद्दीक्षेत्रे 'हिम चण्डीगढ़ परियोजनायाः' कृते अष्ट-सहस्र-बीघा (८००० बीघा) भूमिं प्रदातुम् अपि अनुमतिः दत्ता।

## विद्यालयीय-शिक्षा-मण्डलस्य ३०० विद्यालयेषु सीबीएसई-सदृशाः सुविधाः

शिक्षाक्षेत्रे बृहन्तं निर्णयं स्वीकुर्वता मन्त्रिमण्डलेन हिमाचलप्रदेश- विद्यालयीय- शिक्षा- मण्डलेन सम्बद्धेषु ३०० विद्यालयेषु सीबीएसई-विद्यालयानां सदृशाः सुविधाः प्रदातुं निश्चितम्। एतेषु आधुनिक- शिक्षा-प्रणाली, स्मार्ट-कक्षाप्रकोष्ठाः, सुदृढा आधारभूत-संरचना तथा गुणात्मक- शिक्षण- व्यवस्थायाः विकासस्य योजना वर्तते।

## 'मत्स्यग्रहण-स्वत्वशुल्के' महती सान्त्वना, परागपुर-क्षेत्राय प्राप्तः 'एसडीएम' कार्यालयः

मत्स्यक्षेत्रेण सम्बद्धेभ्यः जनेभ्यः सान्त्वनां प्रदातुं सर्वकारेण 'फिशिंग' (मत्स्यग्रहणम्) कृते स्वत्व- शुल्कं ७ प्रतिशततः न्यूनीकृत्य १ प्रतिशतं कर्तुं स्वीकृतिः प्रत्ता। मुख्यमन्त्रिणा अस्य घोषणा आयव्ययकसत्रे (बजट सत्र) कृता आसीत्। मन्त्रिमण्डलेन परागपुरक्षेत्रे 'एसडीएम' कार्यालयस्य उद्घाटनार्थम् अपि स्वीकृतिः विहिता। अनेन क्षेत्रस्य जनेभ्यः प्रशासनिकसेवाः स्थानीयस्तरे एव उपलप्स्यन्ते, जनेभ्यः च सुदीर्घ-दूरी न चरितव्या भविष्यति।

# मन्त्रिमण्डलस्य निर्णयान् निरस्तं कर्तुं भाजपादलेन निर्वाचन- आयोगे कृता उपालम्भ- पत्रिका- हर्षमहाजनः



भाजपा-पक्षस्य राज्यसभा-सांसदेन हर्षमहाजनेन निर्वाचन-आयोगात् सद्यः प्रभावतः मन्त्रिमण्डलस्य उपवेशनस्य निर्णयानां समीक्षां कर्तुं तथा निर्वाचनप्रक्रियायाः समाप्तिं यावत् एतादृशानां निर्णयानां कार्यान्वयने प्रकाशने च स्थगनं प्रदातुं अभ्यर्थना कृता। अस्मिन् विषये भाजपादलेन आयोगे उपालम्भपत्रिका प्रदत्ता। तेन उक्तं यत् भाजपा लोकतन्त्रस्य निष्पक्ष-निर्वाचन-प्रक्रियायाः च रक्षणार्थं प्रत्येकं संविधानात्मकं पदक्षेपं स्वीकरिष्यति। शुक्रवासरे निर्गते बयाने हर्षमहाजनेन कथितं यत् हिमाचलसर्वकारेण आचारसंहितायाः मध्ये मन्त्रिमण्डलस्य उपवेशनं कृत्वा लोकतान्त्रिक-मर्यादानां उल्लङ्घनं कृतम्। सम्पूर्णे प्रदेशे पञ्चायत, बीडीसी, जिलापरिषद्- निर्वाचनानां कारणात् आचारसंहिता ('कोड ऑफ कंडक्ट') प्रवृत्ता अस्ति। एतादृशे समये मन्त्रिमण्डलस्य उपवेशनस्य आह्वानं स्वयमेव बहून् सन्देहान् जनयति। तेन प्रोक्तं यत् मन्त्रिमण्डले एतादृशाः बहवः निर्णयाः स्वीकृताः, ये साक्षात् निर्वाचनस्य परिणामान् प्रभावितं कर्तुं शक्नुवन्ति। सर्वकारेण महिलानां प्रलोभनार्थं घोषणाः कृताः, नूतनानां पदानां सृजनं कृतं, इतः पर्यन्तं नूतन-एसडीएम-कार्यालयस्य ईएनसी- कार्यालयस्य च स्वीकृतिः दत्ता। एतत् सर्वं निर्वाचनप्रक्रियायाः मध्ये करणीयम् काङ्ग्रेस-सर्वकारस्य दुर्भावनां स्पष्टयति। तेन अङ्कितं यत् काङ्ग्रेसपक्षः तस्य नेतारश्च सर्वदा नैतिकतायाः संविधानस्य च वार्तां कुर्वन्ति, परन्तु यदा स्वस्य उपरि नियम-पालनस्य वार्ता आगच्छति तदा तेषां द्विरूपं चरित्रं (दोहरा चरित्र) सम्मुखम् आयाति। सत्तायाः दुरुपयोगं कृत्वा निर्वाचनानि प्रभावितं कर्तुम् एषः प्रयासः अतीव निन्दनीयः लोकतन्त्राय च सङ्कटपूर्णः वर्तते।

# "व्यवस्था-परिवर्तनस्य उद्घोषणाः निःसाराः, जनविरोधी-नीतिभिः समाजस्य प्रत्येकः वर्गः त्रस्तः- जयरामठाकुरः"



**हिमसंस्कृतवार्ताः- मण्डी।** पूर्वमुख्यमन्त्रिणा प्रतिपक्षनेत्रा च जयरामठाकुरेण मण्डी-नगरात् निर्गतायां विज्ञप्तौ वर्तमानस्य सुखविन्दरसिंहसुक्खु-सर्वकारस्य सार्ध-त्रिवर्षाणां कार्यकालस्य तीक्ष्णा आलोचनां कुर्वता उक्तं यत्- "असत्य- प्रतिज्ञा- योजनानाम् आधारेण सत्तां प्राप्तस्य काङ्ग्रेससर्वकारस्य समीपे स्वकीया एकापि उपलब्धिः वक्तुं किमपि नास्ति। 'व्यवस्था- परिवर्तनस्य' रिक्तं घोषं ददतः अस्य सर्वकारस्य जनविरोधी-नीतिभिः दोषपूर्ण-निर्णयैश्च समाजस्य प्रत्येकः वर्गः पूर्णतः त्रस्तः सञ्जातः। सत्ता-ग्रहणात् पूर्वं ३०० एककं निःशुल्क-विद्युतः प्रतिज्ञा ददता काङ्ग्रेसप्रमुखेन सुखविन्दरसिंहसुक्खुना पूर्वसर्वकारेण दीयमाना निःशुल्का विद्युत् अपि लुण्ठिता।" तेन प्रतिपादितं यत् अद्य सम्पूर्णः प्रदेशः सुक्खु-सर्वकारं प्रश्नं पृच्छति यत् अन्ततः सार्धत्रिवर्षेषु तेन विकासस्य किं कार्यं कृतम्? यतो हि धरातले समग्र-हिमाचलप्रदेशे विकासकार्याणि पूर्णतः अवरुद्धाणि सन्ति, एषः सर्वकारः च जनसामान्यानां उपरि गुरुतर-कराणां भारस्य आरोपणादतिरिच्य स्वकीय-विफलतां गोपयितुं प्रत्येकस्मिन् क्षेत्रे पूर्णतः असफलः सिद्धः जातः।

जयरामठाकुरेण गम्भीराः आरोपाः प्रस्तौता यत्- "केन्द्रसर्वकारस्य जनहितकारी-योजनानां धनस्य दुरुपयोगं कृत्वा राज्यसर्वकारः स्वकीय-प्रमुख- योजनानाम् असत्य-प्रचाराय तत् धनं जलमिव प्रवहति, यदा तु प्रदेशस्य जनता अद्य स्व- अधिकाराय वीथीषु अस्ति। निर्वाचनात् पूर्वं काङ्ग्रेसदलेन प्रदेशस्य जनान् याः महत्यः प्रतिज्ञायोजनाः प्रदत्ताः आसन्, अद्य हिमाचलस्य जनता तासां प्रतिज्ञानां विवरणं याचते, यस्मात् रक्षितुम् मुख्यमन्त्री तस्य मन्त्रिणश्च जनसामान्यस्य मध्ये आगन्तुं निरन्तरं सङ्कोचं कुर्वन्ति।"तेन पृष्टं यत्- "अन्ततः किमर्थं प्रतिश्रुत्यनुसारं १८ वर्षादपि अधिक-वयस्कमहिलाभ्यः अद्यापि प्रतिमासं १५०० रूप्यकाणि न प्रदीयन्ते? तथा च यूनां कृते पञ्च-लक्ष-जीविकायाः महतीं प्रतिज्ञां दत्त्वापि एषः सर्वकारः सार्ध-त्रिवर्षाणां सुदीर्घ- कार्यकाले पञ्चविंशति-सहस्र (२५,०००) जनेभ्यः अपि जीविकां (रोजगारं) प्रदातुं विफलो जातः, येन प्रदेशस्य युवावर्गः प्रताडितः इव अनुभवति।" विद्युत्- जलक्षेत्रयोः सर्वकारं विप्रतीपं गृह्णता प्रतिपक्षनेत्रा कथितं यत्- "काङ्ग्रेसदलेन सत्ताग्रहणात् पूर्वं जनतायै ३०० एककं निःशुल्क- विद्युत्- प्रदानस्य प्रलोभनं दत्तम् आसीत्, परन्तु निःशुल्क- प्रदानस्य वार्ता दूरे अस्तु, पूर्ववर्ति- भाजपा- सर्वकारेण निर्धनजनतायै प्रदत्ता १२५ एककस्य निःशुल्क-विद्युतः सुविधामपि अस्मात् निर्दयीसर्वकारेण लुण्ठिता। न केवलमेतत्, ग्रामीणक्षेत्रेषु अपि जलस्य गुरुतराणि शुल्काणि (विद्युत्-जल-बिलम्) प्रेष्यन्ते, येन ग्रामेषु निवसतां निर्धन-परिवाराणां जीवनं कष्टकरं सञ्जातम्।" सुक्खुसर्वकारेण प्रदेशस्य अन्नदातॄणां, कृषकाणाम्, उद्यानपालानां च पूर्णतः वञ्चनं कृतम्। दुग्ध-उत्पादकेभ्यः दुग्धस्य सर्वकारीय-क्रयणं न क्रियते, मुख्यमन्त्री च असत्यान् पक्षान् करोति यत् वयं दुग्धस्य मूल्यं वर्धयित्वा कृषकाणाम् आयं वर्धितवन्तः; यदा तु कटु-सत्यम् एतत् अस्ति यत् सर्वकारीय- क्रयणस्य अभावात् त्रस्ताः कृषकाः स्व-दुग्धं बहिः वीथीषु प्रक्षिपन्तः सन्ति।

# लोकनिर्माणमन्त्री विक्रमादित्यसिंहः कर्नाटकस्य मुख्यमन्त्रिणा उपमुख्यमन्त्रिणा च सह 'बेङ्गलूरु-प्रारूप' विषये चर्चां कृतवान्





हिमसंस्कृतवार्ताः-हिमाचलस्य राजधानीं (शिमलां) सहितम् अन्यानि नगराणि सुव्यवस्थितं (स्मार्ट) कर्तुं प्रदेशस्य लोकनिर्माण- नगरविकासमन्त्री विक्रमादित्यसिंहः कर्नाटकस्य मुख्यमन्त्रिणा उपमुख्यमन्त्रिणा च सह शुक्रवासरे अमिलत्। अस्मिन् अन्तराले तेन राज्यानां नगराणि सुन्दराणि, सुरक्षितानि, सुव्यवस्थितानि च कर्तुं कर्नाटकस्य विकास-प्रारूपं निकटतः ज्ञातम्। नगरेषु यातायात-प्रबन्धनम्, एकीकृत-कमान-केन्द्रम्, स्मार्ट-सिटी-विकासः, नगरीय-आह्वान-कोषश्च ('अर्बन-चैलेंज-फण्ड') इत्यादिषु विषयेषु गम्भीरा चर्चा अभवत्। विक्रमादित्यसिंहेन उपमुख्यमन्त्रिणा डी. के. शिवकुमारेण सह एका प्रमुखा गोष्ठी अपि विहिता। इदानीं कर्नाटक-प्रारूपे आवश्यकाणि संशोधनानि कृत्वा तत् हिमाचले प्रवर्तयितुं विक्रमादित्यसिंहस्य योजना वर्तते।

सूचनानुसारं शुक्रवासरे कर्नाटके विक्रमादित्यसिंहः मुख्यमन्त्रिणं सिद्धारमैया-महोदयं उपमुख्यमन्त्रिणं डी. के. शिवकुमारं च आधिकारिकरूपेण मिलितवान्। अस्मिन् अवसरे विक्रमादित्यसिंहेन अन्ताराज्यीय-विकास- प्राथमिकतानां जनहित- सम्बद्धानां च विविधानां प्रमुखाणां विषयाणां चर्चा कृता। अनेन सहैव हिमाचलस्य आगामि-संरचनात्मक- योजनानां सफल-कार्यान्वयनाय तयोः मार्गदर्शनं आशीर्वादः च याचितः। विक्रमादित्यसिंहेन कर्नाटकस्य उपमुख्यमन्त्रिणा डी. के. शिवकुमारेण सह शुक्रवासरे एका नीतिगता गोष्ठी अपि आयोजिता। अस्याः चर्चायाः मुख्यकेन्द्रम् आधुनिकसमस्यानां तान्त्रिक- स्थायी-समाधानेषु केन्द्रितम् आसीत्। चर्चायां नगरेषु वाहनानां वर्धमानं भारं नियन्त्रयितुं 'इन्टेलिजेंट- ट्रैफिक- मैनेजमेंट' तथा 'स्मार्ट- मोबिलिटी- सॉल्यूशंस' प्रवर्त्तयितुं तथा एकीकृत- कमान- केन्द्रस्य अन्तर्गतं नागरिकसेवानां त्वरितप्रदानाय, आपत्कालिक-प्रबन्धनाय, २४x७ नगरस्य सुरक्षा- निरीक्षणाय च एकस्याः केन्द्रीकृत-कमान- केन्द्र- व्यवस्थायाः संरचना-निर्माणस्य उपरि विमर्शः जातः। साकमेव 'स्मार्ट- सिटी- विकास' विषये पर्यावरणानुकूल-स्थायी-विकास-प्रारूपस्य, शुद्ध- आधारभूत- संरचनायाः तथा नागरिकाणां जीवनस्तरम् आधुनिकं कुर्वतीनां चिरस्थायी- परियोजनानां विस्तारे अपि सम्भाषणं प्रवृत्तम्। अपरतः, 'नगरीय-आह्वान- कोष' कार्यक्रमस्य अन्तर्गतं नगर-विकास- सम्बद्धानां बृहत्- पूँजीगत-परियोजनानाम् आर्थिकरूपेण आत्मनिर्भरं प्रतिस्पर्धिं च कर्तुं नूतन-वित्तीय-प्रारूपेषु उपवेशने अनुभवाः सहकृताः।अन्यतः, लोकनिर्माण एवं नगर-विकासमन्त्रिणा विक्रमादित्यसिंहेन प्रतिपादितं यत् नगरविकासस्य, आधारभूत-परिष्काराणां, तान्त्रिक-नवाचारस्य च क्षेत्रे कर्नाटकं, विशेषरूपेण च बेङ्गलुरु-नगरं सम्पूर्णदेशाय एकम् अग्रणी-सोपानम् (उदारहणम्) अस्ति। तेन अस्मिन् बलं दत्तं यत् हिमाचलप्रदेशस्य विशिष्ट- भौगोलिक- परिस्थितीनां भविष्यस्य आवश्यकतानां च अनुरूपम् अस्य सफल-प्रारूपस्य सूक्ष्मतायाः अध्ययनं क्रियते। विक्रमादित्यसिंहस्यानुसारम् अस्माकं सङ्कल्पः वर्तते यत् बेङ्गलुरु-नगरस्य अस्य उत्कृष्ट-विकास- प्रारूपस्य प्रमुखानि सूत्राणि आवश्यकैः संशोधनैः सह हिमाचलप्रदेशे अपि पुनरावर्तनीयाः, येन राज्यस्य नगराणि अधिकसुन्दराणि, सुरक्षितानि, सुव्यवस्थितानि, स्मार्ट च भवितुं शक्नुयुः

# किञ्चित् हास्यम्




पुत्री मातरं पृच्छति– "मातः! भवती मातामह्याः गृहे अपि एतावत् कार्यं करोति स्म?"

माता अवदत्– "न पुत्री! तत्र तु अहं केवलं खादामि स्म, पिबामि स्म, आनन्देन च वसामि स्म।"

पुत्री अवदत्– "अतः मातामही भवतीं गृहात् निष्कासितवती!" 😄😃

माता- 😖😵😵😵😵😖

# मुख्यमन्त्री-सम्राटचौधरी-कृषिमन्त्री-विजयकुमारसिन्हयोः महत्त्वपूर्णा मन्त्रणा – कृषकेभ्यः समये खादबीजोपलब्धतायै विशेषबलप्रदर्शनम्

## कृषकपञ्जीकरणम्, उद्याननीतिः, मधुक्रान्तिश्च विषये गम्भीरविमर्शः – कृषिक्षेत्रस्य सुदृढीकरणाय तीव्राः सज्जताः



- **वैश्विकपरिस्थितिषु कृषकहितसंरक्षणाय अनुदानव्यवस्थायाः खादबीजवितरण-व्यवस्थायाश्च सुदृढीकरणविषये मुख्यमन्त्रिणा कृषिमन्त्रिणा च सह विस्तृतचर्चा**

हिमसंस्कृतवार्ता (राघवनाथझा) पाटलिपुत्रम् : बिहारराज्यस्य माननीयः कृषिमन्त्री श्रीविजयकुमारसिन्हा माननीयेन मुख्यमन्त्रिणा श्रीसम्राटचौधरिणा सह महत्त्वपूर्णां मन्त्रणां कृतवान्। अस्यां मन्त्रणायां कृषिविभागसम्बद्धेषु विविधेषु विषयेषु विस्तरेण चर्चा अभवत्। वैश्विकपरिस्थितीनां जनजीवने प्रभावस्य परिप्रेक्ष्ये कृषकेभ्यः समये खादबीजोपलब्धिः,कृषकपञ्जीकरणम्, उद्यानप्रोत्साहननीतिः, बिहार-उद्यान-नर्सरी-अधिनियमः, मधुक्रान्तेः संवर्धनम् इत्यादिषु विषयेषु विशेषरूपेण विचारविमर्शः कृतः।मन्त्रणायां कृषकपञ्जीकरणा-भियानस्य अधिकप्रभावकारितायै विशेषबलं प्रदत्तम्। माननीयः कृषिमन्त्री अवदत् यत् कृषकपञ्जीकरणस्य माध्यमेन कृषकेभ्यः खादबीजयोः समये उपलब्धता सुनिश्चितीकरणं शासनस्य प्राथमिकता वर्तते। अनेन केन्द्र-राज्यशासनयोः विविधाणाम् अनुदानयोजनानां लाभः कृषकेभ्यः पारदर्शिरूपेण सुगमतया च प्राप्स्यते। मुख्यमन्त्रिणा कृषिमन्त्रिणा च सह एतद्विषयेऽपि चर्चा कृता यत् कृषकाः खादबीजवितरणे कस्यापि प्रकारस्य कठिनतायाः सामना न कुर्वन्तु तथा च अनुदानयोजनानां लाभं समये एव प्राप्नुयुः।

राज्यशासनम् अस्यां दिशि पूर्णगम्भीरतया सजगभावेन च कार्यं कुर्वत् अस्ति। कृषिक्षेत्रे उत्तमव्यवस्थाविकासाय कृषकेभ्यश्च अधिकसुविधाप्रदानाय विविधाः योजनाः नीतयश्च प्रभावकारिरूपेण कार्यान्वयितुं सहमतिः अभवत्।मन्त्रणायां बिहार-उद्यान-नर्सरी-अधिनियमस्य अधिकसुदृढीकरणाय तथा राज्ये उद्यानक्षेत्रस्य प्रोत्साहनाय उपायेष्वपि चर्चा अभवत्। तदनन्तरं मधुक्रान्त्यभियानस्य संवर्धनेन कृषकाणां मधुमक्षिकापालकानाञ्च आयवृद्ध्यर्थं विशेषपहलविषये विचारविमर्शः कृतः।माननीयः कृषिमन्त्री श्रीविजयकुमारसिन्हा उक्तवान् यत् आगामी २८ तथा २९ मई २०२६ दिनाङ्कयोः नवीदिल्ली-नगरे शारदीयफसलविषये आयोज्यमानायाः राष्ट्रियकार्यशालायाः सन्दर्भेऽपि मुख्यमन्त्रिणा सह विस्तृतचर्चा अभवत्। अस्यां चर्चायां बिहारस्य कृषिसम्भावनाः, कृषकाणाम् आवश्यकताः, शारदीय-खरीफ-फसलानां उत्पादनवृद्धेः रणनीतिः च विषये विचारः कृतः।माननीयः मन्त्री अवदत् यत् राज्यशासनं कृषकहितेषु पूर्णतया प्रतिबद्धम् अस्ति तथा कृषिक्षेत्रम् आधुनिकं, पारदर्शि, कृषकहितैषि च कर्तुं निरन्तरप्रयत्नाः क्रियमाणाः सन्ति।

# तर्कसंग्रहकार-अन्नमभट्ट-स्मृतौ चतुश्चत्वारिंशत्तमः संस्कृत-शिक्षण-सम्भाषण-शिविरः सम्पन्नः



**हिमसंस्कृतवार्ता (राघव नाथ झा)** विहार संस्कृत संजीवन समाज-संस्थया “आधुनिको भव, संस्कृतं वद” इत्यभियानस्य अन्तर्गतं तर्कसंग्रहकार-अन्नमभट्ट-स्मृत्यन्तर्जालीय-अन्तर्राष्ट्रीय-संस्कृत-शिक्षण-सम्भाषण-शिविरस्य भव्यः समापन-समारोपः संस्कृतमये वातावरणे सम्पन्नः। अयं निरन्तरम् आयोजितः चतुश्चत्वारिंशत्तमः संस्कृत-शिक्षण-सम्भाषण-शिविरः आसीत्, यस्मिन् देश-विदेशस्थितानां विश्वविद्यालय-महाविद्यालय-विद्यालयानां कुलपतयः, प्राचार्याः, आचार्याः, छात्राः, प्रतिभागिनश्च समुपस्थिताः अभवन्।कार्यक्रमम् उद्दिश्य अभियानस्य राष्ट्रीयाध्यक्षः तथा विहार संस्कृत संजीवन समाज-महामन्त्री डॉ मुकेश कुमार ओझा अवदत् यत् संस्कृतभाषायाः ग्रामे ग्रामे, गेहे गेहे, जनमानसे च प्रसारेणैव तर्कसंग्रहकारस्य अन्नमभट्टस्य प्रति यथार्था श्रद्धाञ्जलिः समर्पयितुं शक्यते। तेन संस्कृतभाषा भारतीयसंस्कृतेः प्राचीना ज्ञानपरम्परायाश्च मूलाधारभूता इति प्रतिपाद्य सर्वेषां भारतीयानां संस्कृतसंवर्धने सहयोगस्य आवाहनं विहितम्।कार्यक्रमस्य विधिवदुद्घाटनं कुर्वन् अभियानस्य प्रधानसंरक्षकः पूर्वगृहसचिवश्च डॉ अनिल कुमार सिंह अन्नमभट्टस्य दार्शनिक-वैदुष्यस्य विशदं विवेचनं कृत्वा प्रोक्तवान् यत् न्याय-वैशेषिक-दर्शनयोः सुगमावगमनाय तर्कसंग्रह-ग्रन्थस्य अध्ययनम् अनिवार्यमस्ति।पूर्वभारतीयप्रशासनिकसेवाधिकारी उत्तरप्रदेशीयः अमरनाथ उपाध्याय अपि अवदत् यत् संस्कृत-शिक्षण-सम्भाषण-शिविरेषु सहभागिता भारतीयसंस्कृतेः तत्त्वबोधाय परमावश्यकी वर्तते। संस्कृतभाषायाः ज्ञानेनैव भारतीयसंस्कृतेः सम्यग्गवगमनं सम्भवति।

अभियानस्य राष्ट्रीयसंयोजिका प्रो रागिनी वर्मा मुख्यवक्तृरूपेण तर्कसंग्रहस्य दार्शनिकमहत्त्वं विस्तरेण निरूपितवती। अस्मिन्नवसरे अभियानस्य राष्ट्रीयोपाध्यक्षा डॉ लीना चौहान, संरक्षकः डॉ अनिल कुमार चौबे, जगत नारायण लाल महाविद्यालय-संस्कृतविभागाध्यक्षी डॉ अवंतिका कुमारी, एम एल टी महाविद्यालय-संस्कृतविभागाध्यक्षी डॉ दीप्ति कुमारी, महंथ केशव संस्कृत महाविद्यालय-संस्कृतसहायकाचार्या डॉ नीरा कुमारी, देवेश प्रकाश, तारा विश्वकर्मा, बीजेन्द्र सिंह, डॉ विश्वजीत रुद्रपाल, डॉ डिम्पल, दयानी शारदेय, अदिति चोला तथा वन्दना पटेरिया इत्यादयः विद्वांसः संस्कृतभाषायाः प्रचार-प्रसारयोः विशेषं बलम् अददुः।

अस्मिन्नेवावसरे “अन्नमभट्ट-स्मृति-संस्कृत-सम्भाषण-प्रतियोगिता” अपि समायोजिता, यस्यां डॉ दीप्ति कुमारी तथा देवेश प्रकाश प्रथमपुरस्कारं प्राप्तवन्तौ। डॉ विश्वजीत रुद्रपाल तथा तारा विश्वकर्मा द्वितीयपुरस्कारेण, वन्दना पटेरिया तथा अदिति चोला तृतीयपुरस्कारेण च सम्मानितौ। तथा बीजेन्द्र सिंह, दयानी शारदेय एवं डॉ डिम्पल विशेषपुरस्कारैः समलङ्कृताः।

आगत-अतिथीनां स्वागतं प्रो रागिनी वर्मा विधिवदकरोत्, धन्यवादप्रस्तावं डॉ लीना चौहान प्रस्तुतवती, ऐक्यमन्त्रपाठं च अदिति चोला सम्पन्नवती।

# सामान्यज्ञानप्रश्नोत्तरी

**प्रश्नः:** क्षेत्रफलदृष्ट्या भारतस्य विशालतमं राज्यं किम् अस्ति? **उत्तरम्:** राजस्थानम्

**प्रश्नः:** हिमाचलप्रदेशस्य विशालतमः जनपदः कः अस्ति?
**उत्तरम्:** लाहुल-स्पीति

**प्रश्नः:** भारतस्य राष्ट्रियः पशुः कः अस्ति?
**उत्तरम्:** व्याघ्रः

**प्रश्नः:** हिमाचलप्रदेशस्य राजकीयवृक्षः कः अस्ति?
**उत्तरम्:** राजकीयवृक्षः देवदारुः अस्ति।

**प्रश्नः:** भारतस्य सर्वोच्चं पर्वतशिखरं किम् अस्ति?
**उत्तरम्:** भारतस्य सर्वोच्चं पर्वतशिखरं काञ्चनजङ्घा अस्ति।

**प्रश्नः:** हिमाचलप्रदेशस्य उच्चतम् पर्वतशिखरं किम् अस्ति?
**उत्तरम्:** पर्वतशिखरं शिला (Shilla) अस्ति।

**प्रश्नः:** भारतस्य संविधानपिता कः कथ्यते?
**उत्तरम्:** डॉ. भीमराव आम्बेडकरः कथ्यते।

**प्रश्नः:** हिमाचलप्रदेशस्य का नदी 'कालिन्दी' नाम्ना अपि ज्ञायते? **उत्तरम्:** यमुना नदी 'कालिन्दी' नाम्ना अपि ज्ञायते।

**प्रश्नः:** भारतम् कदा स्वतन्त्रम् अभवत्?
**उत्तरम्:** १९४७ तमे वर्षे अगस्तमासस्य पञ्चदशे दिनाङ्के

**प्रश्नः:** हिमाचलप्रदेशः पूर्णराज्यत्वं कदा प्राप्नोत्?
**उत्तरम्:** १९७१ तमे वर्षे जनवरीमासस्य पञ्चविंशतितमे दिने

**प्रश्नः** पृथ्वी कस्य परितः भ्रमति?
**उत्तरम्-** पृथ्वी सूर्यस्य परितः भ्रमति।

**प्रश्नः** कः गैसः अस्माकं जीवनाय आवश्यकः अस्ति?
**उत्तरम्** प्राणवायुः (ऑक्सीजन) अस्माकं जीवनाय

**प्रश्नः** जलस्य रासायनिकं सूत्रं किम् अस्ति?
**उत्तरम्:** जलस्य रासायनिकं सूत्रं H_2O अस्ति।

**प्रश्नः** प्रकाशसंश्लेषणाय कस्य आवश्यकता भवति?
**उत्तरम्:** प्रकाशसंश्लेषणाय सूर्यप्रकाशस्य, जलस्य, अङ्गाराम्लस्य

**प्रश्नः** गुरुत्वाकर्षणस्य नियमं कः प्रतिपादितवान्?
**उत्तरम्:** गुरुत्वाकर्षणस्य नियमं आइजैक न्यूटन महोदयः प्रतिपादितवान्।

## गीतोक्ताष्टादशाध्यायाश्श्लोकैरष्टादशस्विह कृष्णं योगेश्वरं नत्वा प्रस्तुतस्सारसङ्ग्रहः



मोहजाता कुबुद्धिर्हि सर्वदुःखस्य कारणम्
तस्माद्विवेकभावेन संशयं त्यज भारत।१।
सम्यग्ज्ञानं हि लोकेऽस्मिन् समस्यानां निवारकम्
तस्माज्ज्ञानमयं दीपं प्रज्वालय हृदि स्वकम्।२।
निःस्वार्थभावनाकर्म सुखसमृद्धिदायकम्
कुरु तस्मात्सदा कर्म फलचिन्तां विहाय शम्।३।
यद्यत्करोति कर्माणि तत्सर्वं प्रभुयज्ञवत्
अर्पयित्वा हरौ नित्यं जीवन्मुक्तो नरोऽभवत्।४।
अहङ्कारं परित्यज्य ह्यनन्ते मोदते नरः
शान्तिं विन्दति नू नित्यं परमात्मप्रसादितः।५।
नित्यं योगबलेनैव ह्युच्चचेतनयाऽऽरमेत्
प्रशान्तमनसा चापि परमात्मनि सम्मिलेत्।६।
श्रुतं ज्ञानञ्च यत्किञ्चिज्जीवने तदुपाचरेत्
यस्मात्क्रियाविहीनन्तु ज्ञानं भाररूपं भवेत्।७।
अवसादे नहि स्थित्वा सर्वथा विजयी नु स्यात्
धैर्येण मनसा कृत्वा परं पदमवाप्नुयात्।८।
ईशानुग्रहमाहात्म्यं ज्ञात्वा धन्यो भवेन्नरः
कृतज्ञभावयुक्तेन परोपलब्धिभास्वरः।९।
सर्वत्र सर्वभूतेषु पश्येदीश्वरसंस्थितिम्
विभूतिं दिव्यरूपां शं सत्कृतिञ्चैव सद्गतिम्।१०।
यथाभूतं परं सत्यं द्रष्टुमात्मानमर्पयेत्
विश्वरूपं परं देवं भक्त्याऽपि श्रद्धयाऽर्चयेत्।११।
मनो बुद्धिञ्च नित्यन्नु परमात्मनि योजयेत्
स एव परभक्तस्तु परमात्मनि सम्भवेत्।१२।
मायां विहाय सर्वेशं दिव्यभावेन संश्रयेत्
प्रकृतिं पुरुषं ज्ञात्वा बन्धान् सर्वान् विनाशयेत्।१३।
यथैव गुणदृष्टिश्च तथा चर्यां समाचरेत्
सत्त्वमार्गं समाश्रित्य गुणातीतो नरो भवेत्।१४।
परमेश्वरमेवेह प्राधान्येन प्रधारयेत्
छित्त्वा संसारवृक्षञ्च तमेव शरणं व्रजेत्।१५।
सद्गुणत्वं हि मर्त्यानां स्वयमेव महाफलम्
दैवीसम्पत्समायुक्ता नश्यन्ति संसृतेःखलम्।१६।
श्रेयस्करञ्च यत्कर्म तदेव बललक्षणम्
हितं पथ्यं समादाय प्राप्नुयात्सात्त्विकं फलम्।१७।
सर्वं त्यक्त्वा प्रपद्येत परमात्मैकता गतिः
सर्वपापैःप्रमुच्येत लभ्येत च प्रभुस्थितिः।१८।
गीता ह्यष्टादशाध्याया तस्यास्सारोत्र कीर्तितः
समेषां सुखबोधाय रुरुणा कविना कृतः।१९।
प्राप्नुवन्तु महाभागा जीवनयुद्धकर्षिताः
पठन् स्मरन् ब्रुवंश्चापि भवन्तु मोदनन्दिताः।२०।
काव्यमेतत्पठेद्यो वै गीतासारसमन्वितम्
तस्य कृते कृपावर्षं श्रीकृष्णःकुरुते मुदम्।२१।
इतिश्रीगीतासारसङ्ग्रहे अष्टादशश्लोककुसुमानि
श्रीमद्भगवत्पदारविन्दद्वन्द्वे सानन्दं सभक्ति सम्यक्
शश्वच्छीघ्रं शुभानि समर्पितानीति ॐ शम् ॐ।।

**रचयिता- आचार्यः डा. रुरुकुमारमहापात्रः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**

# उपमुख्यमन्त्रिणा विजयकुमारचौधरिणा पञ्चदशाभ्यर्थिभ्यः नियुक्तिपत्राणि प्रदत्तानि

## निष्ठया समर्पणभावेन च स्वकर्तव्य- पालनं कुर्वन्तु” – उपमुख्यमन्त्री





**हिमसंस्कृतवार्ता (राघव नाथ झा)**

सिञ्चनभवने स्थिते जलसंसाधनविभागस्य सभागारे अद्य आयोजिते नियुक्तिपत्रवितरणसमारोहे उपमुख्यमन्त्री (जलसंसाधनविभागः) श्रीविजयकुमारचौधरी-महोदयेन पञ्चदशाभ्यर्थिभ्यः नियुक्तिपत्राणि प्रदत्तानि। एतेषु षट् नवनियुक्ताः सहायक-अभियन्तारः, अनुकम्पाधारेण नियुक्ताः षट् निम्नवर्गीय-लिपिकाः तथा त्रयः कार्यालय-परिचारकाः सन्ति।कार्यक्रमस्य शुभारम्भः उपमुख्यमन्त्रिणा, विभागस्य सचिवेन डॉ. चन्द्रशेखरसिंह-महोदयेन अन्यैश्च वरिष्ठाधिकारिभिः दीपप्रज्वलनेन कृतः। अस्मिन् अवसरे अभियन्ताप्रमुखः श्रीवरुणकुमारः उपस्थितानाम् अधिकारिणां नवनियुक्तानां च हार्दिकं स्वागतं कृतवान्।स्वसम्बोधने उपमुख्यमन्त्री सर्वेषां नवनियुक्तानां सहायक-अभियन्तॄणां कर्मिणां च हार्दिकं अभिनन्दनं शुभाशंसाश्च प्रदाय उक्तवान् यत्— “अद्यप्रभृति यूयं सर्वे जलसंसाधनविभागपरिवारस्य अभिन्नाङ्गानि जातानि। अयं विभागः मुख्यतया ग्रामीणक्षेत्रेषु कार्यं करोति तथा कृषकेभ्यः सामान्यजनाय च सिञ्चन-बाढसुरक्षादि-महत्त्वपूर्णसेवाः प्रददाति। अतः अपेक्ष्यते यत् यूयं सर्वे पूर्णया ईमानदारितया, निष्ठया समर्पणभावेन च स्वकर्तव्यपालनं करिष्यथ।

”तेन उक्तं यत् क्षेत्रेषु कार्यरत-अधिकारिणां कर्मिणां च सक्रियता कार्यकुशलता च विभागस्य छविं सुदृढां करोति। नवनियुक्तेभ्यः सहायक-अभियन्तृभ्यः विशेषतया निर्देशः दत्तः यत् ते नियमितरूपेण कार्यस्थलानां निरीक्षणं कुर्वन्तु तथा योजनानां प्रभावीक्रियान्वयने सक्रियां भूमिकां निर्वहन्तु।अनुकम्पाधारेण नियुक्तान् कर्मकरान् सम्बोध्य उपमुख्यमन्त्री उक्तवान् यत् सेवाकाले कस्यचित् कर्मिणः निधनानन्तरं तस्य आश्रितेभ्यः शीघ्रं नियुक्तिप्रदानं विभागस्य संवेदनशीलतायाः परिचायकम् अस्ति। एतस्याः प्रक्रियायाः शीघ्रसम्पादनाय क्षेत्रीय-प्रधानकार्यालययोः अधिकारिणां प्रशंसा अपि तेन कृता।समारोहे विभागस्य सचिवः डॉ. चन्द्रशेखरसिंह-महोदयः अपि सर्वेभ्यः नवनियुक्तेभ्यः सहायक-अभियन्तृभ्यः कर्मिभ्यश्च अभिनन्दनं शुभकामनाश्च प्रदत्तवान्। तेन उक्तं यत्— “युष्माकं प्रति उत्कृष्टकार्यस्य अपेक्षा अस्ति, स्वकर्तव्यपालने विभागतः पूर्णसहयोगः प्रदास्यते।”अस्मिन् अवसरे अभियन्ताप्रमुखः ब्रजेशमोहनः, तकनीकी-परामर्शी मनोजरमणः, संयुक्तसचिवः अजयकुमारः सहिताः अन्येऽपि पदाधिकारी उपस्थिताः आसन्।



## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य एका विचित्रा वार्ता मया श्रुता। आन्तर्जालिक-साक्षात्कारे अभ्यर्थी परीक्षकैः नमस्कारमुद्रया उपवेष्टुम् आदिष्टः। भासितं यत् तेन देवपूजा क्रियते इति।

**नन्दिनी-** सत्यम्, एषा वार्ता अत्यन्तं हास्यप्रदा अस्ति। स्वयं साक्षात्कर्तृभिः देवस्मरणं कारितः सः! अस्तु, अन्या एका कारुणिकी वार्ता अपि अस्ति। एकेन सेवानिवृत्तेन अधिकारिणा पत्न्याः समाधि- समीपे स्वस्य समाधिः निर्मितः।

**काव्या-** अहह, पत्नीं प्रति तस्य महान् स्नेहः दर्शितः। एषः अमर-प्रणयः। क्रीडा-जगतः अपि एका कौतुकपूर्णा वार्ता अस्ति। दश- सहस्र- मुद्राणां पारितोषिकाय त्रिदिवसीया 'शिलापत्र- कर्तरी' क्रीडा-प्रतियोगिता आयोजिता।

**नन्दिनी-** अहो! बाल्यावस्थायाः क्रीडायाः कृते एतावान् महान् उत्सवः आचरितः! एतत् तु अद्भुतम्। अन्ते, भोजन-विषये अपि एका वार्ता अस्ति। एकेन नरेण एकवर्षं यावत् केवलं वने अन्विष्टं खाद्यं भक्षितम्।

**काव्या-** कष्टकरः अयं तपोमार्गः तेन स्वीकृतः। प्रकृतेः महत्त्वं तेन ज्ञातम्। अद्य एताः एव विचित्राः वार्ताः। मेलिष्यामः श्वः।

## "लौकिकन्यायकोशः"

## "भद्रघटन्यायः"



भद्रनामकः कश्चन कस्यचन् यक्षस्य सेवां कृतवान्। तेन संतुष्टेन यक्षेण भद्राय एकः कामपूरकः घटः प्रदत्तः। तत प्रभृति स भद्रः सर्वाः अपि कामनाः साधयति स्म। बन्धुमित्रादिभिः सह नन्दति स्म। कदाचित् मद्यपानेन मत्तः सः तं भाण्डं गृहीत्वा इतस्ततः भ्रमणम् आरब्धवान्। तदा तस्य हस्तात् च्युतः सः भाण्डः भग्नः अभवत्। एवं दुर्दैवग्रस्ताः महत् ऐश्वर्यं प्राप्य अपि तत् नाशयन्ति रक्षितुं न शक्नुवन्ति इति भावः।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**